संस्कृत वार्ताः

02.04.2024

सायम् - 06:20

मुख्यवार्ताः

· निर्वाचनायोगेन आगामि-लोकसभा-विधानसभा-निर्वाचनेषु आलोचनात्मक-प्रतिक्रियाः अन्य-गतिविधियः समीक्षितुं षड्राज्येषु विशिष्ट-पर्यवेक्षकानां नियुक्तिः कृता अस्ति।

· प्रधानमन्त्री नरन्द्रमोदी लोकसभानिर्वाचनाय उत्तराखण्डस्य नैनीताल-उधमसिंह-नगरस्य रूद्रपुरक्षेत्रे निर्वाचनजनसभायां भारतं तृतीयार्थिक-महाशक्ति-रूपे परिवर्तितुं प्रतिबद्धता पुनरुच्चारितवान् ।

· सुरक्षा-बलेन अद्य बारामूला-जनपदस्य सोपोर-क्षत्रे त्रयः आतङ्कि-सहयोगिनः निगडिताः।

· भारतम् अरुणाचल-प्रदेशस्य अनेकानां क्षेत्राणां नामपरिवर्तनस्य निरन्तरकार्याचरणं विरुध्य चीनस्य निन्दाम् अकरोत् ।

· काङ्गो लोकतान्त्रिकगणराज्येन आफ्रिकाराष्ट्रस्य प्रथमा महिलाप्रधानमन्त्रीरूपेण जूडिथ् सुमिन्वा तुलुका इत्येषा नियुक्ता।

· आई-पी-एल्- क्रिकेट-स्पर्धायाम् अद्य बैङ्गलुरूस्थे चिन्नास्वामी-स्टेडियम् इति क्रीडाङ्गणे सायं रॉयल-चैलेञ्जर्स-बैंगलुरु-दलं लखनऊ-सूपर-जाईन्ट्स्-दलं सम्मुखीकरिष्यति ।

निर्वाचनायोगः-पर्यवेक्षकाः

निर्वाचनायोगेन आगामि-लोकसभा-विधानसभा-निर्वाचनेषु आलोचनात्मक-प्रतिक्रियाः अन्य-गतिविधियः समीक्षितुं षड्राज्येषु विशिष्ट-पर्यवेक्षकानां नियुक्तिः कृता अस्ति ।एतेषु राज्येषु सप्तकोटितोप्यधिक-जनसंख्या-समन्वितानि पश्चिम-बंगाल-उत्तर-प्रदेश-महाराष्ट्र- बिहार-आंध्र-प्रदेश-ओडिशा चेत्यादीनि राज्याणि सम्मिलितानि सन्ति ।आंध्र-प्रदेश-ओडिशयोः एकस्मिन्नेव दिवसे विधानसभानिर्वाचनं भविष्यति । एते पर्यवेक्षकाः विशिष्टरूपेण सीमावर्ति-क्षेत्रेषु अलोकतांत्रिक-निर्वाचन-गतिविधयः अवरोद्धुं बलं प्रदास्यन्ति ।निर्वाचनायोगेन आंध्र-प्रदेश, कर्नाटक, तमिलनाडु, उत्तर प्रदेश, ओडिशा चेत्यादिषु राज्येषु निर्वाचनद्वन्द्वे धन-बलप्रयोगम् अवरोद्धुं विशिष्ट-वित्त-पर्यवेक्षकः अपि नियुक्तः ।

## प्रधानमन्त्री-उत्तराखण्डः

प्रधानमन्त्री नरन्द्रमोदी स्वकीये तृतीयकार्यकाले भारतं तृतीयार्थिक-महाशक्ति-रूपे परिवर्तितुं प्रतिबद्धता पुनरुच्चारितवान् । लोकसभानिर्वाचनाय उत्तराखण्डस्य नैनीताल-उधमसिंह-नगरस्य रूद्रपुरक्षेत्रे स्वकीयां प्रथमनिर्वाचनजनसभां सम्बोधयन् श्रीमोदी राज्यस्य विकासाय एन-डी-ए-सर्वकारेण विहितानां कार्याणां विषये सम्वादं कृतवान् । तेन सी-ए-ए इत्यस्यान्तर्गतं भारतीय-नागरिकता-प्रदानस्य व्यवस्थाविरुध्य्र काङ्ग्रेसदलस्य विरोधः आलोचितः । तेन काङ्ग्रेस-दलं राष्ट्रियहितानाम् अवहेलनायै प्रत्यारोपितम् । श्रीमोदी प्रोक्तवान् यत् यदि भाजपा-दलं पुनः सत्तारूढं भवति, तर्हि भ्रष्टाचारं विरुध्य इतोऽपि सुदृढप्रयासान् करिष्यति । अस्मिन् निर्वाचनासने काङ्ग्रेस्-दलस्य प्रत्याशिनं विरुध्य भाजपा-दलस्य प्रत्याशिः अजयभट्टः निर्वाचन-रणे स्थास्यति । अवधेयं यत् अप्रैलमासस्य नवदश-दिनाङ्के राज्यस्य पञ्च-लोकसभा-निर्वाचनासनेषु मतदानं भविष्यति ।

## जम्मू-कश्मीर

केन्द्र-शासित-प्रदेशे जम्मू-कश्मीरे आरक्षिबलैः सुरक्षा-बलैः सह सम्मिल्य अद्य बारामूला-जनपदस्य सोपोर-क्षत्रे त्रयः आतङ्कि-सहयोगिनः निगडिताः । अधिकारिभिः प्रोदीरितं यत्, आरक्षिबलैः सेनायाः द्वाविंशतितम-राष्ट्रिय-राइफल्स्-सीआरपीएफ इत्यनाभ्यां सह फ्रूट-मंडी-क्रॉसिंग इत्यत्र स्थापिते एकस्मिन् संयुक्त-सैन्यशिविरपार्श्वे पलायमाणाः त्रयः संदिग्ध-जनाः ससतर्कं भूत्वा चातुर्येण निगडिताः। अन्वेषणानन्तरं तेषां पार्श्वे एकं भुशुण्डिं , चलदूरभाषयन्त्रं ,अन्यापत्तिजनक-सामग्र्यः च समावाप्ताः । अस्मिन् मध्ये, सोपोरस्थ्ये आरक्षि-स्थात्रे विधि-सम्बद्ध-धारायाः अन्तर्गतं विध्यादेशं प्रकल्प्य अन्वीक्षणं समारब्धम्।

## अरुणाचलप्रदेशः- रणधीर-जायसवालः

भारतम् अरुणाचल-प्रदेशस्य अनेकानां क्षेत्राणां नामपरिवर्तनस्य निरन्तरकार्याचरणं विरुध्य चीनस्य निन्दाम् अकरोत् । विदेश-प्रकरण-प्रवक्ता रणधीर-जायसवालः प्रोक्तवान् यत् निरन्तरं नामपरिवर्तनस्य कार्याचरणेन अरुणाचल-प्रदेशस्य वास्तविकता नैव परिवर्तितुं शक्यते । एतत् सदैव भारतस्याभिन्नाङ्गत्वेन स्थास्यति ।ध्यानास्पदं वर्तते यत् भारतस्य इयं प्रतिक्रिया चीनस्य निरन्तरं नामपरिवर्तनस्य कार्याचरणस्यानन्तरं समागता अस्ति । ह्यः विदेश-मन्त्री डॉ0 एस0 जयशंकरः प्रोक्तवान् आसीत् यत् नामपरिवर्तनेन कोऽपि प्रभावः न भवति सहैव तेन प्रोक्तं यत् अरुणाचल-प्रदेशः भारतस्य राज्यम् आसीत् स्थास्यति च।

ऋतु-विज्ञान-विभागः

ऋतु-विज्ञान-विभागेन प्रोक्तं यत् आगामि-सप्तदिवसेषु पश्चिम-हिमालय-क्षेत्रस्य केषुचित् स्थानेषु न्यूनतः मध्यमवृष्टेः सम्भावना वर्तते । विभागस्य अनुमानम् अस्ति यत् अस्य मासस्य पञ्चदिनाङ्कं यावत् पश्चिमोत्तर-भारतस्य भूतलक्षेत्राणां केषुचित् स्थलेषु न्यूनतः मध्यमवृष्टेः सम्भावना वर्तते । विभागेन अनुमीयते यत् जम्मू-कश्मीर, लद्दाख, गिलगित, बाल्टिस्तान, मुजफ्फराबाद , हिमाचलप्रदेश-प्रभृतिषु क्षेत्रेषु आगामि-दिवसत्रयं यावत् सविद्युतं मेघगर्जनस्य संभावना वर्तते । अस्य मासस्य त्रिदिनाङ्के-पञ्चदिनाङ्के च उत्तराखंडे अपरत्र चतुर्दिनाङ्के पञ्चदिनाङ्के च पश्चिम-उत्तर-प्रदेशे अपि मेघगर्जनायाः अनुमानं व्यक्तीकृतम् अस्ति ।

जम्मू-कश्मीर-अमरनाथयात्रा:

जम्मू-कश्मीरयोः, मुख्यसचिवेन अटल-डुल्लू इत्यनेन ह्यः चतुर्विंशत्यधिक-द्विसहस्र-तम-वर्षस्य (संजय) इत्याख्यायाः वार्षिक-श्रीअमरनाथ-यात्रायाः सुचारूसंचालनाय प्रशासनेन कृतायाः सर्वसज्जतायाः विस्तृतसमीक्षा विहिता। आकाशवाण्याः जम्मू-संवाददात्रा ख्यापितं यत् उपवेशने आरक्षि-महानिदेशकेन, प्रशासनिक-सचिवैः, संबंधित-उपायुक्तैः अपि च अन्य विभागाध्यक्षैः, श्री अमरनाथजी श्राइन बोर्ड (एस.ए.एस.बी.), सीमा - मार्ग-संघटनेन, ऋतुविभागेन, दूरसंचार-सेवा-प्रदातृभिः, आपद्-प्रबंधन-समित्याः प्रतिनिधिभिः च सह नागरिकैः आराक्षि-बलस्य-वरिष्ठ-पदाधिकारिभिः चापि भागं भजितम्। मुख्यसचिवेन सर्वोच्च-न्यायालयस्य निर्देशानां आलोके पहलगाम-बालटालयोः मार्गाणां संरक्षण-विषये बीआरओ इत्यनेन कृतानाम् उपायानां निरीक्षणं कृतम्। तेन तीर्थयात्रिभ्यः भोजन-निवासयोः कृते सुरक्षित-क्षेत्राणां सीमांकनाय समाह्वानं कृतम्। मुख्य सचिवेन तीर्थयात्रिभ्यः कष्ट-मुक्त-सेवा-प्रदातुं स्वास्थ्य, जलशक्ति, विद्युद-विकास-विभाग, परिवहन, ऋतु-विभाग चेत्यादिभिः कृतानाम् उपायानां अपि समीक्षा कृता।

सञ्जयसिंहः-कारागारमुक्तः

सर्वोच्चन्यायालयेन अद्य आम-आदमीपार्टीति दलस्य नेता राज्यसभा-सांसदः च संजयसिंहः इत्यस्य कथित-आबकारी-शुल्क-प्रवञ्चनायां कारागारात् अस्थायि-मुक्तेः आदेशः प्रदत्तः। संयुक्त-वक्तव्ये न्यायाधीशः सञ्जिवखन्ना, दीपङ्करदत्तः, प्रसन्नबीवरले चेत्यादयः प्रोक्तवन्तः यत् सञ्जय-सिंहः न्यायविवेचनावधौ कारागारमुक्तः भवितुम् अर्हति। न्यायालयेन उक्तं यत् इदानीं सः मुक्तिकाले राजनैतिक-कार्यक्रमेषु भागं ग्रहीतुं शक्नोति। परन्तु ईडी इत्यस्य अन्वीक्षण-विषये सः किमपि

सार्वजनिकं वक्तव्यं दातुं न शक्नोति। न्यायालयेन इदम् अपि उक्तं यत् मुक्तेः नियमाः निष्पक्षन्यायालयेन एव निर्णेतव्याः ।अवधेयं यत् आप-दलस्य नेता गतवर्षस्य अक्टोबर्-मासे निगडितः, दिल्ली-नगरस्य तिहाडेति कारागारे च प्रेषितः आसीत् ।

काङ्गो प्रथममहिलाप्रधानमन्त्री:

काङ्गो लोकतान्त्रिकगणराज्येन आफ्रिकाराष्ट्रस्य प्रथमा महिलाप्रधानमन्त्रीरूपेण जूडिथ् सुमिन्वा तुलुका इत्येषा नियुक्ता। काङ्गोगणराज्यस्य राष्ट्रपतिना फेलिक्स त्सेसिकेडी इत्यनेन अस्याः नियुक्तिः कृता । सा निर्वाचनसङ्कल्प: पूर्णं कृत्वा गतवर्षस्य अन्ते पुनः निर्वाचितः भूत्वा नवसर्वकारस्य निर्माणस्य दिशि महत्त्वपूर्णं पदक्षेपं कृतवती।

आई-पी-एल्

आई-पी-एल्- क्रिकेट-स्पर्धायाम् अद्य बैङ्गलुरूस्थे चिन्नास्वामी-स्टेडियम् इति क्रीडाङ्गणे सायं सार्धसप्तवादने रॉयल-चैलेञ्जर्स-बैंगलुरु-दलं लखनऊ-सूपर-जाईन्ट्स्-दलं सम्मुखीकरिष्यति । ह्यः रात्रौ मुम्बय्याः वानखेडे-स्टेडियम् इत्यत्र राजस्थान-रॉयल्स्-दलेन मुम्बई-इण्डियन्स्-दलं षट्-क्रीडकाणां हानौ पराजितम् ।

।। इति वार्ता: ।।